# Rajna Kritam Krishnanarayana Stotram

# રાજ્ઞા કૃતં કૃષ્ણનારાયણસ્તોત્રમ્

## Document Information

Text title : Rajna Kritam Krishnanarayana Stotram

File name : rAjnAkRRitaMkRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3. 29/81-97||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# રાજ્ઞા કૃતં કૃષ્ણનારાયણસ્તોત્રમ્

સર્વે પ્રસાદયામાસુરત્યર્થં ત્વાં ચ માં તદા ।
તુષ્ટુવુઃ પરયા પ્રીત્યા જ્ઞાત્વા વૈ પરમેશ્વરમ્ ॥ ૮૧॥

સાધવ ઊચુઃ ।
યત્ર ક્વાપિ ભવેજ્જન્મ પશ્ચાત્પુણ્યપ્રતાપતઃ ।
ભવચ્છરણમાપન્નાઃ પુત્રાઃ સ્મો ભગવઁસ્તવ ॥ ૮૨॥

અચ્યુતો વૈ પિતા યસ્ય તે ત્વચ્યુતા ભવન્તિ વૈ ।
વયં ચાઽચ્યુતતાં પ્રાપ્તાઃ કૃપૈષા શ્રીહરે તવ ॥ ૮૩॥

સુપુત્રેષુ ચ દિવ્યેષુ કૃપયા ત્વં સમાગતઃ ।
સ્નેહપાત્રાણિ સંવીક્ષ્ય પ્રત્યક્ષઃ સા કૃપાઽપરા ॥ ૮૪॥

અથાઽતોઽપિ સદા સત્સુ વાસો યથા તનૌ તથા ।
સતાં મધ્યે વસ કૃષ્ણ કૃપેયં પારમાર્થિકી ॥ ૮૫॥

યથા ધામ્નિ તથા સત્સુ મણ્ડલેષુ નિવાસનમ્ ।
સદા સાધુસ્વરૂપેણ કરોતુ પરમાં કૃપામ્ ॥ ૮૬॥

સાધ્વ્ય ઊચુઃ ।
માતર્લક્ષ્મિ મહામાતસ્ત્વાં વયં શરણાગતાઃ ।
મોક્ષાર્થિન્યો બ્રહ્મસાધ્વ્યો ભવત્યાઃ પુત્રિકા વયમ્ ॥ ૮૭॥

માતૃવાત્સલ્યમત્યન્તં સુતાસુ તુ નિસર્ગજમ્ ।
તત્પુરસ્કૃત્ય જનનિ દદાસિ દર્શનં હિ નઃ ॥ ૮૮॥

અબલાનાં બલોપેતં ભાગ્યમદ્ય પ્રવર્તતે ।
દિવ્યતાં પ્રાપ્ય તે યોગાન્મુક્તતાં યામ એવ હ ॥ ૮૯॥

કરુણા તેઽપ્યતુલ્યાઽસ્તિ યત્સાધ્વીષુ વિભાવનમ્ ।
તત્રાપિ ચાતિકારુણ્યં યદિ વાસં પ્રરોચયેઃ ॥ ૯૦॥

પ્રાર્થનામુરરીકૃત્ય યથેષ્ટં પ્રકરોત્વિહ ।
અનાદિશ્રીકૃષ્ણનારાયણાજ્ઞયાઽક્ષરેશ્વરિ ॥ ૯૧॥

રાજ્ઞી પ્રોવાચ ।
ધન્યાહં મમ પુત્ર્યશ્ચ પુત્રા રાજ્યં નૃપસ્તથા ।
પ્રજા ધન્યા મમ લક્ષ્મિ યદત્ર દર્શનં તવ ॥ ૯૨॥

કુરુ વાસં સદા ચાઽત્ર તવ સર્વં ભવત્યપિ ।
દાસ્યહં સર્વદા તેઽસ્મિ વસ લક્ષ્મિ કૃપાં કુરુ ॥ ૯૩॥

સંસારે લાભ એવાઽત્ર પ્રાપ્તઃ સાધ્વીસમાગમઃ ।
ભવત્યા દર્શનં સાક્ષાત્ સ એવાનન્યલાભકઃ ॥ ૯૪॥

રાજોવાચ ।
કુલં રાજ્યં ધનં વંશઃ સર્વં કૃષ્ણ ભવત્કૃતે ।
મયાઽર્પિતં કૃતં કૃત્સ્નં ત્વદાત્મકં ત્વદર્થકમ્ ॥ ૯૫॥

કૃપેયં દર્શનં સાક્ષાત્તવાત્ર સત્સમાગમાત્ ।
પ્રાપ્તવ્યં સર્વમેવાદ્ય પ્રાપ્તં ચાત્યન્તિકં ફલમ્ ॥ ૯૬॥

સર્વદા વસ મે ગેહે કૃપાં કૃત્વા પરેશ્વર ।
ઇત્યુક્ત્વા પ્રણનામૈવ પપાત પાદયોર્નૃપઃ ॥ ૯૭॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૨૯-અધ્યાયાન્તર્ગતં રાજ્ઞા તથા અન્યૈઃ કૃતં કૃષ્ણનારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। ૨૯/૮૧-૯૭॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. 29/81-97..

Proofread by PSA Easwaran

---

*Rajna Kritam Krishnanarayana Stotram*
pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*